## परिशिष्ट

# अमरकाव्यमें भोजनार्थ निमंत्रित मानसिंहके अपमानका विवरण

[1]शते षोडशके त्रिशन्मितेऽब्दे गुर्जरस्थिते ।
मानसिंहो मेदपाटे आयातः पुनरुद्भटः ।।२३।।

अथैकदा प्रोद्धतमानसिंहं प्राघूर्णिकीभूतमभूतपूर्वम् ।
निमंत्रयामास सुग्रमंत्रः प्रतापसिंहः प्रचुरप्रतापः ।।२४।।

उदयसागरनामजलाशयप्रविलसत्तट उत्कटमानसः ।
रसवतीकरणाय तदादिशत् द्विज(ज)नानवनीशशिरोमणिः ।।२५।।

तदा नरैस्तत्र तु पाकशाला कृता प्रयुक्ता सकलैव शाला ।
मिष्टैः शुभान्नैर्घृतपक्वयुक्तैर्लेह्यादिपेयादिक भोज्य सं······ ।।२६।।

आकारितस्तत्र तु मानसिंहः समागतो भाग्यमिहेति जानन् ।
सुभोजनं राणमहीश्वरेण सहैकपंक्तौ मम भावि तस्मात् ।।२७।।
मुदोपविष्टः सुविशिष्टशिष्टः कुलीनराजन्यपवित्रपंक्तौ ।
महानसे वीरगणैः समेतः स मानसिंहो विरराज सिंहः ।।२८।।
प्रतापसिंहो बहुवस्तुसिद्धयै, उच्चैः समुत्सार्य विशालचालं ।
बाह्वोः समाज्ञापयति स्वकीयसमस्तलोकेभ्यः उदारवीरः ।।२९।।
स्वर्णादिपात्रेषु समस्त···वस्तूनि सूदैः परिवेषितानि ।
अपूर्वरूपानि च तानि दृष्ट्वा सुविस्मयं प्राप स मानसिंहः ।।३०।।

स मानसिंहो निजगाद वाक्यं प्रतापसिंहं प्रति देव शीघ्रं ।
आयाहि पंक्तौ शुभभोजनार्थमुच्चासने चोपविशत्वितीश ।।३१।।
प्रतापसिंहस्तु तदीयवाक्यं चक्रे श्रुतं वाश्रुतवत्तदैव ।
पुनर्जगादाथ स मानसिंहस्तदेव वाक्यं महता स्वरेण ।।३२।।
राणेश्वरो मे जठरे स्मिष्टभार इत्यब्रवीत्कूर्म नरेशपुत्र ।
कुमारस्त्वायात्त्ववदत्तदेति प्रतापसिंहस्तु पुनर्बभाषे ।।३३।।
स वस्तुसिद्धि विदधाति धन्यां श्रुत्वाखिलं निर्मलमानसः सः ।
ज्ञात्वा तथैवेति च मानसिंहश्चकार सद्भोजनमादरेण ।।३४।।
वीरैः प्रवृद्धैस्तु तदा तदीयः प्रतापसिंहाशयशौर्यविद्भिः ।
कृतो विचारो मनसा दृशा च मिथो न युक्तात्र भुजिक्रियेति ।।३५।।

---

१. गते शते षोडश एकहीन त्रिशद्गतेऽब्दे शुभ फाल्गुनेऽभूत् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org